# <u>भूषणसारे प्रश्नाः</u>

उदयशंकर खाटुया

**प्रश्नः सुपां सुपा तिङा ... इति कारिकां विलिख्य कारिकानुसारं समासभेदान् सोदाहरणं निरूप्य समासस्य षाड्विध्यं कथं सिध्यतीति विलिख्यताम् ।**

उत्तरम्-

वैयाकरणभूषणसारस्य समासशक्तिनिर्णयावसरे वैयाकरणतल्लजेन कौण्डभट्टेन भट्टोजिदीक्षितोक्ता सुपां सुपा .. इत्यादि कारिका उल्लिखिता । सम्पूर्णा कारिका हि –

**सुपां सुपा तिङा नाम्ना धातुनाथ तिङां तिङा।**

**सुबन्तेनेति च ज्ञेयः समासः षड्विधो बुधैः ।।** इति।

प्रचीनैः वैयाकरणैः समासघटकपदानां वहिरङ्गं विश्लिष्य समासस्य चातुर्विध्यं स्वीकृतम् । परन्तु तैः स्वीकृते अव्ययभावादिलक्षणे अव्याप्त्यतिव्याप्त्यादिदोषदर्शनात् भट्टोजिदीक्षितेन तादृशस्य भेदस्य प्रायिकत्वं प्रदर्शितम् । तन्नये समासः षड्विधः। वस्तुतः एष षड्विधो विभागः समासघटकपदानां वैशिष्ट्यमादायैव स्वीकृतः।

१. **सुपां सुपा** –

   सुप् इत्यनेन तदन्तविधिना सुबन्तपदमेव गृह्यते । तेन सुबन्तेन सह सुबन्तपदस्य समासो भवति। यथा – राजपुरुषः । राज्ञः पुरुषः इति लौकिकविग्रहः। अत्र पदद्वयमेव सुबन्तम् ।

२. **सुपां तिङा** –

सुबन्तेन सह तिङन्तपदस्य समासो भवति। अत्र पूर्वपदं सुबन्तम् उत्तरपदं च तिङन्तम् । यथा – पर्यभूषयत् , अनुव्यचलत् इत्यादि। परि, अनु इति पदद्वयेन यथाक्रमम् अभूषयत् व्यचलत् (वि अचलत्) इति तिङन्तपदद्वयस्य समासो भवति। अनु, परि , वि इत्येतत् त्रयमेव गतिसंज्ञकम् । अतः **गतिमतोदात्तवता तिङापि समासः** इति वार्तिकेन समासो भवति।

३. **सुपां नाम्ना –**

सुबन्तपदेन नामपदस्य अर्थात् केवलं प्रातिपदिकस्य समासो भवति। साधारणतया पदयोः पदानां वा मध्ये एव समासो भवति । परन्तु क्वचित् सुबन्तेन केवलं नामपदस्य समासो भवति। यथा – कुम्भकारः इति। कुम्भ ङस् कार इत्येवम् अवस्थायामेव समासो भवति। उपपदमतिङ् इत्यनेन अत्र उपपदसमासो भवति। अत्र **गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः** इति परिभाषा ज्ञापकम् । अस्याश्च परिभाषया **उपपदमतिङ्** इति सूत्रे अतिङ्ग्रहणम् एव ज्ञापकम् ।अत्रेदमपि ज्ञेयं यत् केवलम् उत्तरपदे एव सुबुत्पत्तेः प्राक् समासो भवति। अन्यथा चर्मक्रीती इत्यदौ पूर्वपदस्य चर्मन् इत्यस्य प्रातिपदिकत्वे नलोपापत्तिः।

४. **सुपां धातुना –**

अत्र पूर्वपदं सुबन्तम् उत्तरपदं च केवलं धातुः, न तु सुप्तिङन्तम्। यथा  कटं प्रवते इति कटप्रूः। कट इति सुबन्तं गत्यर्थकः प्रुङ् इति धातुः। प्रुङ् इत्यस्मात् क्विप् इति भवति। क्विपः सर्वापहारित्वाल्लोपेन धातुमात्रमुत्तरपदमिति भावः। अत्र अन्येभ्योऽपि दृश्यते इति सूत्रस्थेन **क्विब्वचिप्रच्छ्यायतस्तूकटप्रूजुश्रीणां दीर्घश्च** इति वार्तिकबलात् निपातनात् समासः।

५. **तिङां तिङा –**

अत्र पदद्वयमेव तिङन्तम् ।तद्यथा पिवतखादत । पिवत खादत इति सततं यस्यां क्रियायामभिधीयते सा पिवतखादत **इत्यर्थः।आख्यातमाख्यातेन क्रियासातत्ये** इतिमयूरव्यंसकाद्यन्तर्गतगणसूत्रात् समासः।

६. **तिङा सुबन्तस्य –**

तिङन्तपदेन सह सुबन्तपदस्य समासो भवति । अत्र पूर्वपदं तिङन्तम् उत्तरपदं च सुबन्तमिति बोध्यम्। तत्रोदाहरणं यथा – जहिस्तम्ब इति। स्तम्बं जहि इति आभीक्ष्ण्येन य आह स जहिस्तम्ब इति।स्तम्बीघातकर्ता इति समासार्थः।**जहि कर्मणा बहुलमाभीक्ष्ण्ये कर्तारं चाभिदधाति** इति मयूरव्यंशकाद्यन्तर्गतगणसूत्रात् समासः।

एवं प्रकारेण समासः षड्विधः। समासस्य षाड्विध्यं **सह सुपा** इति सूत्रस्य योगविभागेनैव सिध्यति। तथाहि सह सुपा इति सूत्रे **सुबामन्त्रिते पराङ्गवत्स्वरे** इत्यस्मात् सुबित्यनुवर्तते । तेन सुबन्तेन सह सुबन्तस्य समासो भवति इत्यर्थो लभ्यते । इष्टसिध्यर्थं तु कृ योगविभागे सह इत्येको योगः सुपा इत्येकश्च योगः पृथक्त्वेन प्राप्यते। द्वयोरेव योगयोः सुप् इति अनुवर्तते । तेन आद्ययोगस्य सुबन्तेन सह समर्थाश्रितस्य यस्य कस्यापि समासो भवति ।तेन नाम्ना तिङा इत्यादीनां समासो सिध्यति। अन्त्येन च केवलं सुबन्तेन सुबन्तस्यैव समासो भवति इति शम् ।